IJARSCT
International Journal of Advanced Research in Science, Communication and Technology
International Open-Access, Double-Blind, Peer-Reviewed, Refereed, Multidisciplinary Online Journal
ISSN: 2581-9429
Volume 5, Issue 5, December 2025
Impact Factor: 7.67

# श्रीमद्भगवद्गीतायां कर्मयोगः

तीजराम वर्मा

शोधच्छात्रःसंस्कृत विभाग

पौडी परिसर हेमवती नन्दन बहुगुणा गढवाल विश्वविद्यालय, श्रीनगरं, गढवाल, उत्तराखण्ड

atirtharamji@gmail.com

**सारः** - संसारस्य प्रत्येकं जनानां मनसि जीवनस्य, जगतः, ईश्वरस्य सम्बन्धे संशयो भवत्येव। किमुचितं, किमनुचितं, जीवनं किं , कश्च मृत्युरित्यादयः प्रश्नाःसामान्यजनान् विदुषश्च कदाचित् न कदाचित् स्पृशन्त्येव। अनुत्तरेषु च प्रश्नेषु मनसि खिन्नताऽपि भवति। जीवनस्य सर्वेषां समस्यानां समाधानं साकल्येन सारल्येन च यत्र मिलति सा अस्ति श्रीमद्भगवद्गीता ।

श्रीमद्भगवद्गीता वस्तुतो महाभारतस्यैवांशःपरं महत्वात् पृथक्रूपेण प्रसिद्धं। महाभारते भीष्मपर्वणि पञ्चविंशतितमादध्यायाद् (२५) द्वाचत्वारिंशत्तमाध्यायः श्रीमद्भगवद्गीता इति नाम्ना प्रसिद्धम् । अस्यां गीतायां सप्तशती (७००) श्लोकाःसन्ति। तेषु श्लोकेषु चतुस्सप्तत्युत्तरं पञ्च शतं (५७४) श्लोका भगवतः श्रीकृष्णस्योपदेशरूपेण , चतुरशीतिः(८४) श्लोका अर्जुनस्य प्रश्नरूपेण , संजयस्य एकचत्वारिंशत् श्लोकाःसन्ति। एकः श्लोकः धृतराष्ट्रमुखेन विद्यते।

**कर्म एव योगः कर्मयोगः ,** कर्म एवंप्रकारेण कर्त्तव्यं यत् कर्म योगःस्यात्। यथा कश्चित् समाधिप्राप्तो योगी सर्वथा समतायुक्तः, अक्षुब्धो भवति तथैव यदि कोऽपि कर्म कुर्वन् भवति स कर्मयोगी। गीतायां निष्कामकर्म कर्मयोगः कथ्यते। केवलं कर्म अर्थात् आसक्तियुक्तं कर्म बन्धनस्य कारणं भवति कर्मयोगो बन्धनस्य कारणं न भवति परमात्मसाक्षात्कारस्य साधनमेव भवति।

IJARSCT
International Journal of Advanced Research in Science, Communication and Technology
International Open-Access, Double-Blind, Peer-Reviewed, Refereed, Multidisciplinary Online Journal
ISSN: 2581-9429
Volume 5, Issue 5, December 2025
Impact Factor: 7.67

आरुरुक्षोर्मुनेर्योगं कर्म कारणमुच्यते।

योगारूढस्य तस्यैव शमः कारणमुच्यते॥[1]

**सङ्केतशब्दः** - श्रीमद्भगवद्गीता, कर्मयोगः, निष्कामकर्म, महाभारतम्, जीवनम्, ईश्वरः, समाधिः।

[1] ०६/०३ श्रीमद्भगवद्गीता